"रञ्जकं नाम यत् पित्तं तद्रसं शोणितां नयेत् ।
यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम्॥"
धृतिं मेधाम् ।
"यदालोचकसंज्ञं तद्रूपग्रहणकारणम् ।
भ्राजकं कान्तिकारि स्यात् लेपाभ्यङ्गादिपाचकम् ॥
पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृशोऽयं निगद्यते ।
अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान्॥
बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति ।
श्यामकेशः क्षमी स्थूलो बहुवीर्य्यो महाबलः ॥
पित्तं वह्निर्वह्निजं वा तदस्मात्
पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः ।
गौरोष्णाङ्गस्ताम्रहस्तोऽङ्घ्रिरक्तः
शूरो मानी पिङ्गकेशोऽल्पलोमा ॥"
पित्तप्रकृतिकस्तथा यथा,—
"यामर्द्धकपिमार्जारयक्षोलूकाश्च पैत्तिकाः ॥"
पित्तस्योपशमहेतुमाह ।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनज्योत्स्नाभूगृहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्शनम् ।
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ॥"
अथ पित्तप्रकोपकारणानि ।
"कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसंभोगतृषाक्षुधाभिहननव्यायाममद्यादिभिः।
भुक्ते जीर्य्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां
मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत्॥"
इति भावप्रकाशे पूर्व्वखण्डे २ भागे॥
( यथा च ।
"अम्लोष्णरूक्षाम्लकटुप्रदाहैः
क्रोधैः सुरासेवनेनातिघर्म्मैः ।
क्रोधादपि खेदने च व्यवाये
अभोजने याति कोपञ्च पित्तम् ॥
कुलत्थमाढ़कीयूषस्तेषु शिग्रु
तिलातसीराजिकाशाकखण्डे ।
निशाध्वागरे योधने च श्रमे वा
घनान्ते शरत्सु प्रकोपः प्रदिष्टः ।
अथ वासरे मध्यगेऽर्के निशीथे
ऽस्वजीर्य्यत्प्रभुक्ते प्रकोपः प्रदिष्टः ॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये ॥)
स तु ज्वरजनकमन्दाग्निजनकः ।
"मन्दाग्निस्तस्य जनको मन्दाग्निर्ज्जनकास्त्रयः ।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥*॥
( यथा च ।
"पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥
त्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।
बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥"
इति वाभटे सूत्रस्थाने द्वादशेऽध्याये ॥
"पित्तविकाराश्चत्वारिंशदत ऊर्द्ध्वं व्याख्यास्यन्ते। तद्यथा, ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च विदाहश्च अन्तर्दाहश्चांसदाहश्चोष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावयवदरणञ्च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांसदाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्तविस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च हरितत्वञ्च हारिद्रत्वञ्च नीलिका च कक्षा च कामला च तिक्तास्यता च पूतिमुखता च तृष्णाया आधिक्यञ्चातृप्तिश्चास्यपाकश्च गलपाकश्चाक्षिपाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्च्चस्त्वञ्चेति चत्वारिंशत् पित्तविकाराः । पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति। सर्व्वेष्वपि खल्वेतेषु पित्तविकारेष्वन्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामिकर्म्म च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः । तद्यथा,— औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्ज्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वलक्षणमिदमस्य भवति । तं तं शरीरावयवमाविशतो दाहौष्ण्यपाकस्वेदक्लेदकोथस्रावरागाः । यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत् । तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत। स्नेहविरेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्तहरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनन्तु सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः। तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलञ्चापकर्षति । तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते । यथाग्नौ व्यपोढ़े केवलमग्निगृहञ्च शीतं भवति तद्वत् ।" इति चरके सूत्रस्थाने विंशेऽध्याये ॥ * ॥
"पित्तमुष्णन्तीक्ष्णं द्रवं विस्रमम्लं कटुकञ्च । तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहाः सुकुमारावदातगात्राः प्रभूतपिप्लुव्यङ्गतिलकपिड़काः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशाः तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूका द्रवत्वात् शिथिलमृदुसन्धिमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च विस्रत्वात् प्रभूतपूतिकक्षास्यशिरःशरीरगन्धाः कट्वम्लत्वादल्पशुक्रव्यवायापत्याः । त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ )

पित्तघ्नी, स्त्री, ( पित्तं हन्तीति । हन् + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् । ततो ङीप् । ) गुडूची । इति शब्दचन्द्रिका ॥ ( पित्तनाशके, त्रि । यथा, भावप्रकाशे । १ । १ ।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ॥" )

पित्तज्वरः, पुं, ( पित्तनिमित्तको ज्वरः । ) पैत्तिकज्वरः । यथा,—
"विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमस्रदोषान् ॥"
इति राजनिर्घण्टः ॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ पित्तज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घनवता अतीतेनेत्यर्थः । किन्तु भेषजं तदाह ।
"तिक्तामृतायवैः पाठाकट्फलाभ्यां सहोदकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्वाथः ॥
"पर्पटो वासकस्तिक्ता कैराती धन्वयासकः ।
प्रियङ्गुश्च शृतः क्वाथ एषां शर्करया युतः ॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिक्वाथः ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च शृतः क्वाथः एष पित्तज्वरापहः ॥
मुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिक्वाथः ॥
"पटोलमथ धन्याकं मधुकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णाञ्चातिप्रमाथिनीम्॥"
इति पटोलादिक्वाथः ॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिक्वाथः ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥
ह्रीवेरचन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत् ॥"
इति ह्रीवेरादिक्वाथः ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवान्विताः ।
वालकं धान्यकं बिल्वं कषायो माचिकान्वितः ॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिक्वाथः ॥